CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust
CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust Funding IKS-MoE Grant-2

श्रीगणेशाय नमः॥ अथ भारतसावित्री लिख्यते॥ व्यास उवाच॥ द्वारावत्यां स्थितं कृष्णं चिंतया
युधिष्ठिरः= मासवैपुरा॥ पांडवानां हितार्थाय शीघ्रं कृष्णेन गम्यतां॥१॥ श्रीकृष्णः स्वदेशेन गतो वै ह
स्तिनापुरं॥ विदुरो दृष्टवान् कृष्णं स्वागतं भो महाप्रभो॥२॥ भवद्दर्शनमात्रेण कृतकृत्योस्मि
सफला जाता- सर्वदा॥ अद्य मे भगवद्भक्तिः सुहृद्दर्शनमात्मनः॥३॥ अद्य मे सफलं जन्म सुप्रभावं
च जन्मनः॥ अद्य मे सफलं ज्ञानं जीवितं च सुजीवितं॥४॥ अद्य मे पितरस्तुष्टा गोविं
दे गृहमागते॥ अद्याष्टमी च नवमी च चतुर्दशी च अद्यायने च विषुवं च दिनत्रयं च॥
अद्यैव पिंडपितृयज्ञमखस्य कालो दामोदरेण सहसा गृहमागतेन॥५॥ श्रीभगवा
नुवाच॥ साधु साधु महाप्राज्ञ सर्वशास्त्रविशारद॥ तुष्टोहं ते वरं ब्रूहि ददामि कुरुनंदन
॥६॥ विदुर उवाच॥ आसनं वंधुसंकीर्णं विपुसंकीर्णं मंदिरं॥ शयनं सुतसंकीर्णं देहि मे
मधुसूदन॥७॥ कृष्णस्यागमनं श्रुत्वा राजराजः सुयोधनः॥ विदुरस्य गृहं गत्वा

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust
CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

इदं वचनमब्रवीत् ॥८॥ दुर्योधन उवाच ॥ द्रोणं भीष्मं परित्यज्य मां चैव मधुसूदन ॥ किमर्थं पु
ण्डरीकाक्ष भुक्तं वृषलिभोजनं ॥९॥ श्रीभगवानुवाच ॥ शुद्धं भागवतस्यान्नं शुद्धं भागीरथीजलं ॥
शुद्धं विष्णुपदं तीर्थं शुद्धमेकादशीव्रतं ॥१०॥ ये शूद्रा भगवद्भक्ता विप्रा भागवताः स्मृताः ॥ सर्ववर्णेषु ते
शूद्रा ये ह्यभक्ता जनार्दने ॥११॥ चांडालमपि मद्भक्तं यो भजेत स बुद्धिमान् ॥ यो न मन्येत मद्भक्तान् स याति
नरकं ध्रुवं ॥१२॥ कस्य दोषः कुले नास्ति व्याधिना को न पीडितः ॥ व्यसनं केन न प्राप्तं कस्य सौख्यं निरंत
रं ॥१३॥ भोजनं पृच्छसि राजेंद्र आदरं किं न पृच्छसि ॥ भोजनं तु भवेज्जीर्णं आदरस्तु जरामरः ॥१४॥ द्विषदन्नं
न भोक्तव्यं द्विषंतं नैव भोजयेत् ॥ पांडवान् द्विषसे राजन् मम प्राणा हि पांडवाः ॥१५॥ ये त्वां द्विषंति स मां द्विषंति
शास्ति=शास्ति= यस्तानन्नु समामन्नु ॥ एकात्म्यं भागसे राजन् पांडवैर्धर्मचारिभिः ॥१६॥ प्रीतिभोज्यानि चान्नानि आपद्भो
ज्यानि वा पुनः ॥ न च संप्रीयसे राजन् न चाप्यापद्गता वयं ॥१७॥ आदरादुपनीतानि शाकान्यपि सुयोध
न ॥ प्रीणंति मम गात्राणि नामृतं मानवर्जितं ॥१८॥ गोत्रस्य येन कर्तुं [illegible] यो राजवंधुशतैः सह ॥ कुर्वंतु
मम वाक्यानि मम बोध्यानि बोधयेत् ॥१९॥ मम वाक्यं कुरुश्रेष्ठ सत्यं गच्छ सुयोधन ॥ राज्यं तेषां समं

आगोऽपराधस्त्वमरः=४
आगसे अपराधं करोषि=४

Kashi Maharani Collection, Ramnagar Fort, Varanasi
Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust
CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust Funding IKS-MoE Grant-2

दत्वा यूयं पंचोत्तरं शतं ॥२०॥ वने द्वादशवर्षाणि अज्ञातेन त्रयोदशं ॥ पंचग्रामार्थिनो राजन् पांडवाः स
युधिष्ठिराः ॥२१॥ इंद्रप्रस्थं यमप्रस्थं जयंतं वारुणावतं ॥ देहि मे चतुरो ग्रामान् पंचमं हस्तिनापुरं ॥२२॥ दु त्वं =
र्योधन उवाच ॥ इंद्रप्रस्थं गुरोर्दत्तं यमप्रस्थं कृपस्य च ॥ वारुणावतं च भीष्मस्य जयंतं सूर्यनंदने ॥२३॥
नागा ह्वायं = नागाह्वपुरे स्माकं पंचग्रामा व्यवस्थिताः ॥ एवं चैव स्वका ग्रामान् कृष्ण हे देवकीनंदन ॥२४॥ सूच्यग्र कि+
णापि तीक्ष्णेन यावद्भिद्यते मही ॥ तावन्मात्रं न प्रदास्यामि विना युद्धेन केशव ॥२५॥ श्रीभगवानुवाच ॥
यदा यदा पश्यसि वानरध्वजं धनुर्धरं पांडुवं म[illegible]शो ॥ गदाप्रहस्तं भ्रमितं वृकोदरं तदा तदा दास्य यदा तव
सि सर्वमेदिनीं ॥२६॥ नरे चतुष्कं तुरगैश्च योधैः शतं ज्येष्ठं शतं पंचशतं रथैश्च ॥ ह्यार्जुनो मुंचति बाणव सैन्यं ५
र्षं तदा तदा दास्यसि सर्वमेदिनीं ॥२७॥ धृतराष्ट्र उवाच ॥ ब्रूहि संजय यद्वृत्तं युद्धं तेषां महात्मनां ॥ पांडवा
नां कुरूणां च संप्रवृत्तं कुलक्षये ॥२८॥ केतत्र प्रमुखा योद्धा के चात्र महारथाः ॥ भीष्मद्रोणौ कथं भग्नौ कर्णश
महारथो = ल्यौ कथं हतौ ॥२९॥ महाबला हि के तत्र कथं ते विनिपातिताः ॥ पुनस्तु मम मंदात्मा [illegible] न च दुर्मतिः ॥३०॥
संजय उवाच ॥ मेदिनी भयनिर्घोषं पार्थसारथिमुच्यते ॥ प्ररामा सिंहभीकेशं दुर्लभं चक्रपाणिनं ॥३१॥ दुर्योध

+ महाबलास्तु के तत्र कथं ते विनिपातिताः ३॥ २८॥

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust
CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust Funding IKS-MoE Grant-2

नःसपुत्रेणद्रोणःसहसुतेनच॥ भीष्मो भूरिश्रवाश्चैव वधैते तिरथाःस्मृताः॥२२॥ शृणु राजन्प्रवक्ष्यामि य
स्यकि= थामांपरिपृच्छसि॥ अर्जुनः सात्यकिश्चैव धृष्टद्युम्नो घटोत्कचः॥२३॥ शिखंडी चाभिमन्युश्च वायुपु
त्रस्तथैव च॥ नकुलः सहदेवश्च धर्मपुत्रो युधिष्ठिरः॥२४॥ विराटश्चोत्तरश्चैव द्रुपदश्च महारथः॥ पां
डवानां बले योद्धाः सर्वे विष्णुपराक्रमाः॥२५॥ कौरवाणां बले योद्धाः सर्वे संकर्षणप्रभाः॥ शकुनिः सौब
हो= लो भीष्मः कृतवर्मा जयद्रथः॥२६॥ भूरिश्रवाश्च बाह्लीको भगदत्तस्तथैव च॥ उलूकः सोमदत्तिश्च शरि उल्लूकः उलूकः
विंदुश्च पार्थिवः॥२७॥ दुःशासनो विचित्रश्च राजा दुर्योधनस्तथा॥ द्रोणो द्रौणिर्विकर्णश्च कलिंगस्तथैव
च॥२८॥ एते द्वाविंशतिः प्रोक्ता मया तेषु महारथाः॥ नानाशस्त्रप्रहरणाः सर्वे युद्धविशारदाः॥२९॥ आदि सभा वन
सुप्तिकंच= विराट मथोद्योगं च भीष्मगुरु रवि ज शल्य सुप्तिकम् च॥ स्त्रीपर्व शांतिमनुशासनमश्वमेधं व्यासाश्रमं मुशलया
न स्विवावरोहं॥४०॥ आदिपर्व सभापर्व पर्व मारण्यकं तथा॥ विराटपर्व विज्ञेयं चोद्योगंतरनंतरं॥४१॥ उद्योगं पंचमं प
र्वं भीष्मपर्व ततः परं॥ सप्तमं द्रोणपर्व च कर्णपर्व तु चाष्टमं॥४२॥ नवमं शल्यपर्व च गदापर्व ततः परं॥ सौप्तिकं त २ प्रि३
तः पर्व यदुवंशस्तथैव च॥४३॥ गर्भपातविकं पर्व स्त्रीपर्व तदनंतरं॥ शांतिपर्व ततः प्रोक्तं मश्वमेधं च पांडु
शं॥४४॥ स्वर्गारोहणकं पर्व हरिवंशस्तथैव च॥ कृत्वाष्टादशपर्वाणि संख्या द्वैपायनस्य च॥४५॥ भाति

Kashi Maharani Collection, Ramnagar Fort, Varanasi
Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust
CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE - Grant-2

लोकेषु= सर्वेषु देवेषु रतिः सर्वत्र जंतुषु ॥ तरणं सर्वपापानां तस्माद्भारतमुच्यते ॥४६॥ भारतस्य समुद्रस्य मेरोर्नारायणस्य च ॥ अप्रमेया
णि चत्वारि पुण्यतो यशसा गुणाः ॥४७॥ हेमंते प्रथमे मासे शुक्लपक्षे त्रयोदशी ॥ प्रवृत्तं भारतं युद्धं नक्षत्रे यमदैवते ॥४८॥
फाल्गुनेन हतो भीष्मः कृष्णपक्षे च सप्तमी ॥ अष्टम्यां चैव सौमद्रो नवम्यां च जयद्रथः ॥४९॥ दशम्यां भगदत्तश्च महामुनि ह्रे
कर्णः= पातितः ॥ एकादश्यां मद्रराजे हतो वीरघटोत्कचः ॥५०॥ ततः प्रभातसमये विराटद्रुपदौ हतौ ॥ द्वादश्यां चैव सायाह्ने
णा द्रोणाचार्यो हतो रणे ॥५१॥ त्रयोदश्यां च पूर्वाह्णे वृषसेनो निपातितः ॥ तस्मिन्नेवाह्नि तद्युद्धे वर्तमाने चतुर्दशी ॥५२॥ निःशब्द
तूर्यं हतवीर्यशस्त्रं प्रशांतदर्पं धृतराष्ट्रसैन्यं ॥ न शोभते सूर्यसुतेन हीनं वंदं ग्रहाणामिव चंद्रहीनं ॥५३॥ मुखं कमलपत्रा
क्षं यथाभ्रवरावर्जितं ॥ तथा तत्कौरवं सैन्यं कर्णहीनेन शोभते ॥५४॥ अमावास्यां हतः शल्यो मद्रराजो महाबलः ॥ अमावा
स्यां मूर्ध्नि भग्नो राजा दुर्योधनो हतः ॥५५॥ धृतराष्ट्र उवाच ॥ गदया पातयामास भीमसेनो निमेषणः ॥ कथं दुर्योधनो रा ग
जा भीमसेनेन निपातितः ॥५६॥ संजय उवाच ॥ अन्यथा भाषितं युद्धं छलेनाहतमन्यथा ॥ अक्षौहिण्यः सहस्राणि नव द
तिशतानि च ॥५७॥ राजपुत्रसहस्राणि हतानि भीष्मेण निवर्तितः ॥ धृष्टद्युम्नो शिखंडी च द्रौपद्याः पंच चात्मजाः ॥५८॥ एव
मष्टादशं हंति युक्तो हि रणे दिने दिने ॥ दिनानि दश भीष्मेण रामो भारद्वाजेन पंच च ॥५९॥ दिनद्वयं तु कर्णेन शल्येनार्द्ध दि
नं तथा ॥ गदायुद्धं दिनार्द्धं तु एतद्भारतमुच्यते ॥६०॥ नव नागसहस्राणि नागे नागे शतं रथाः ॥ रथे रथे शतं चाश्वा अश्वमश्वे स्य
शतं नराः ॥६१॥ सर्वसैन्ये महासैन्ये कुरुसैन्ये महात्मनः ॥ पार्थो नारोहयेत् स्वर्गं राजपुत्रान् यशस्विनी ॥६२॥ रणाय द्वैपजेन
+ यशस्विनं स्यपिपाठः + ॥१॥ द्रौपदी च = १

Kashi Maharani Collection, Ramnagar Fort, Varanasi
Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust
CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE - Grant-2

रीसितेन युधिष्ठिरः॥ वेदीं कृत्वा कुरुक्षेत्रं यूपं कृत्वा जनार्दनं॥६३॥ पांचाली मरणीं कृत्वा वह्निं कृत्वा वृकोदरं॥
दुर्योधनं पशुं कृत्वा कर्णं कृत्वा महाहविः॥६४॥ होतारमर्जुनं कृत्वा यजमानो युधिष्ठिरः॥ गांडीवेन स्रुवेणौ
३ व हूयमानेषु राजसु॥६५॥ आयज्ञिकमिदं द्रव्यं अहमेको द्रुवेच्युतः॥ यज्ञेनानेन देवेशः सुप्रीतस्तु जनार्द
नः॥६६॥ इमं भारतसावित्रीं प्रातरुत्थाय यः पठेत्॥ दिवा वा यदि वा रात्रौ शमेषु विशमेषु च॥६७॥ न भयं
विद्यते किंचित् कार्यसिद्धिमवाप्नुयात्॥ अहोरात्रकृतं पापं पठमाने विनश्यति॥६८॥ संवत्सरकृतं पठमा पापं
ने विनश्यति॥ यत्फलं गोसहस्रेषु हूयमानेषु यत्फलं॥६९॥ प्राप्नोति पठनाद् व्यासस्य वचनं यथा॥
यत्र योगेश्वरः कृष्णो यत्र पार्थो धनुर्द्धरः॥ तत्र श्रीर्विजयो भूतिर्ध्रुवा नीतिर्मतिर्मम॥७०॥ इति श्री
वेदव्यासविरचितं श्रीभारतसावित्रीस्तोत्रं संपूर्णं शुभमस्तु॥ ॥७०००। नवहजार हाथी॥ ७०···· नवलाख ३
७०······ नवकोटयः॥ ७०········ नवसै करोडि

Kashi Maharani Collection, Ramnagar Fort, Varanasi
Kashi Maharani Collection, Ramnagar Fort, Varanasi